শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ ত্রিষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ ত্রিষষ্টিতমঃ সর্গঃ ॥

## দধিমুখান্মধুৱনৱিধ্ৱংসৱার্তামাকর্ণ্য সুগ্রীৱস্য হনুমদাদীনাং সাফল্যৱিষযেঽনুমানম্

ততো মূর্ধ্না নিপতিতং ৱানরং ৱানরর্ষভঃ।
দৃষ্ট্বৈৱোদ্বিগ্নহৃদযো ৱাক্যমেতদুৱাচ হ॥ **5.63.1** ॥

উত্তিষ্ঠোত্তিষ্ঠ কস্মাৎ ৎৱং পাদযোঃ পতিতো মম।
অভযং তে প্রদাস্যামি সত্যমেৱাভিধীযতাম্॥ **5.63.2** ॥

কিং সম্ভ্রমাদ্ধিতং কৃৎস্নং ব্রূহি যদ্ ৱক্তুমর্হসি।
কচ্চিন্মধুৱনে স্বস্তি শ্রোতুমিচ্ছামি ৱানর॥ **5.63.3** ॥

স সমাশ্ৱাসিতস্তেন সুগ্রীৱেণ মহাত্মনা।
উৎথায স মহাপ্রাজ্ঞো ৱাক্যং দধিমুখোঽব্রৱীৎ॥ **5.63.4** ॥

নৈৱর্ক্ষরজসা রাজন্ ন ৎৱযা ন চ ৱালিনা।
ৱনং নিসৃষ্টপূর্ৱং তে নাশিতং তত্তু ৱানরৈঃ॥ **5.63.5** ॥

ন্যৱারযমহং সর্ৱান্ সহৈভির্ৱনচারিভিঃ।
অচিন্তযিৎৱা মাং হৃষ্টা ভক্ষযন্তি পিবন্তি চ॥ **5.63.6** ॥

এভিঃ প্রধর্ষণাযাং চ ৱারিতং ৱনপালকৈঃ।
মামপ্যচিন্তযন্ দেৱ ভক্ষযন্তি ৱনৌকসঃ॥ **5.63.7** ॥

শিষ্টমত্রাপৱিধ্যন্তি ভক্ষযন্তি তথাপরে।
নিৱার্যমাণাস্তে সর্ৱে ভ্রুকুটিং দর্শযন্তি হি॥ **5.63.8** ॥

ইমে হি সংরব্ধতরাস্তদা তৈঃ সম্প্রধর্ষিতাঃ।
নিৰ্বার্যন্তে ৱনাৎ তস্মাৎ ক্রুদ্ধৈর্ৱানরপুঙ্গৱৈঃ॥ **5.63.9**॥

ততস্তৈর্বহুভির্ৱীরৈর্ৱানরৈর্ৱানরর্ষভাঃ।
সংরক্তনযনৈঃ ক্রোধাদ্ধরযঃ সম্প্রধর্ষিতাঃ॥ **5.63.10**॥

পাণিভির্নিহতাঃ কেচিৎ কেচিজ্জানুভিরাহতাঃ।
প্রকৃষ্টাশ্চ তদা কামং দেৱমার্গং চ দর্শিতাঃ॥ **5.63.11**॥

এৱমেতে হতাঃ শূরাস্ত্বযি তিষ্ঠতি ভর্তরি।
কৃৎস্নং মধুৱনং চৈৱ প্রকামং তৈশ্চ ভক্ষ্যতে॥ **5.63.12**॥

এৱং ৱিজ্ঞাপ্যমানং তং সুগ্রীৱং ৱানরর্ষভম্।
অপৃচ্ছৎ তং মহাপ্রাজ্ঞো লক্ষ্মণঃ পরৱীরহা॥ **5.63.13**॥

কিমযং ৱানরো রাজন্ ৱনপঃ প্রত্যুপস্থিতঃ।
কিং চার্থমভিনির্দিশ্য দুঃখিতো ৱাক্যমব্রৱীৎ॥ **5.63.14**॥

এৱমুক্তস্তু সুগ্রীৱো লক্ষ্মণেন মহাত্মনা।
লক্ষ্মণং প্রত্যুৱাচেদং ৱাক্যং ৱাক্যৱিশারদঃ॥ **5.63.15**॥

আর্য লক্ষ্মণ সম্প্রাহ ৱীরো দধিমুখঃ কপিঃ।
অঙ্গদপ্রমুখৈর্ৱীরৈর্ভক্ষিতং মধু ৱানরৈঃ॥ **5.63.16**॥

নৈষামকৃতকার্যাণামীদৃশঃ স্যাদ্ ৱ্যতিক্রমঃ।
ৱনং যদভিপন্নাস্তে সাধিতং কর্ম তদ্ ধ্রুৱম্॥ **5.63.17**॥

ৱারযন্তো ভৃশং প্রাপ্তাঃ পালা জানুভিরাহতাঃ।
তথা ন গণিতশ্চাযং কপির্দধিমুখো বলী॥ **5.63.18**॥

পতির্মম ৱনস্যাযমস্মাভিঃ স্থাপিতঃ স্বযম্।
দৃষ্টা দেৱী ন সন্দেহো ন চান্যেন হনূমতা॥ **5.63.19**॥

ন হ্যন্যঃ সাধনে হেতুঃ কর্মণোঽস্য হনূমতঃ।
কার্যসিদ্ধির্হনুমতি মতিশ্চ হরিপুঙ্গৱে॥ **5.63.20** ॥

ৱ্যৱসাযশ্চ ৱীর্যং চ শ্রুতং চাপি প্রতিষ্ঠিতম্।
জাম্বৱান্ যত্র নেতা স্যাদঙ্গদশ্চ মহাবলঃ॥ **5.63.21** ॥

হনূমাংশ্চাপ্যধিষ্ঠাতা ন তত্র গতিরন্যথা।
অঙ্গদপ্রমুখৈর্ৱীরৈর্হতং মধুৱনং কিল॥ **5.63.22** ॥

ৱিচিত্য দক্ষিণামাশামাগতৈর্হরিপুঙ্গৱৈঃ।
আগতৈশ্চাপ্রধৃষ্যং তদ্ধতং মধুৱনং হি তৈঃ॥ **5.63.23** ॥

ধর্ষিতং চ ৱনং কৃৎস্নমুপযুক্তং তু ৱানরৈঃ।
পাতিতা ৱনপালাস্তে তদা জানুভিরাহতাঃ॥ **5.63.24** ॥

এতদর্থমযং প্রাপ্তো ৱক্তুং মধুরৱাগিহ।
নাম্না দধিমুখো নাম হরিঃ প্রখ্যাতৱিক্রমঃ॥ **5.63.25** ॥

দৃষ্টা সীতা মহাবাহো সৌমিত্রে পশ্য তত্ত্বতঃ।
অভিগম্য যথা সর্ৱে পিবন্তি মধু ৱানরাঃ॥ **5.63.26** ॥

ন চাপ্যদৃষ্টৱা ৱৈদেহীং ৱিশ্রুতাঃ পুরুষর্ষভ।
ৱনং দত্তৱরং দিৱ্যং ধর্ষযেযুর্ৱনৌকসঃ॥ **5.63.27** ॥

ততঃ প্রহৃষ্টো ধর্মাত্মা লক্ষ্মণঃ সহরাঘৱঃ।
শ্রুৎৱা কর্ণসুখাং ৱাণীং সুগ্রীৱৱদনাচ্চ্যুতাম্॥ **5.63.28** ॥

প্রাহৃষ্যত ভৃশং রামো লক্ষ্মণশ্চ মহাযশাঃ।
শ্রুৎৱা দধিমুখস্যৈৱং সুগ্রীৱস্তু প্রহৃষ্য চ॥ **5.63.29** ॥

ৱনপালং পুনর্ৱাক্যং সুগ্রীৱঃ প্রত্যভাষত।
প্রীতোঽস্মি সোঽহং যদ্ভুক্তং ৱনং তৈঃ কৃতকর্মভিঃ॥ **5.63.30** ॥

ধর্ষিতং মর্ষণীযং চ চেষ্টিতং কৃতকর্মণাম্।
গচ্ছ শীঘ্রং মধুৱনং সংরক্ষস্ৱ ৎৱমেৱ হি।
শীঘ্রং প্রেষয সর্ৱাংস্তান্ হনূমৎপ্রমুখান্ কপীন্॥ **5.63.31** ॥

ইচ্ছামি শীঘ্রং হনুমৎপ্রধানান্
শাখামৃগাংস্তান্ মৃগরাজদর্পান্।
প্রষ্টুং কৃতার্থান্ সহ রাঘৱাভ্যাং
শ্রোতুং চ সীতাধিগমে প্রযত্নম্॥ **5.63.32** ॥

প্রীতিস্ফীতাক্ষৌ সম্প্রহৃষ্টৌ কুমারৌ
দৃষ্টৱা সিদ্ধার্থৌ ৱানরাণাং চ রাজা।
অঙ্গৈঃ সংহৃষ্টৈঃ কর্মসিদ্ধিং ৱিদিৎৱা
বাহ্ৱোরাসন্নাম্ সোঽতিমাত্রং ননন্দ॥ **5.63.33** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে ত্রিষষ্টিতমঃ সর্গঃ ॥